# 2020

## SANSKRIT — GENERAL

**Paper : GE/CC-1**

**(Sanskrit Poetry)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

## Section - A

**(Marks : 20)**

### Unit - I

**1.** (क) अधोलिखितयोः ***कस्यचिदेकस्य*** मातृभाषया अनुवादः कार्यः। 5×1

(अ) वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।

(आ) अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः।।

(ख) अधोलिखितयोः ***कस्यचिदेकस्य*** सप्रसङ्गं व्याख्या संस्कृतभाषया देवनागरलिप्या च कार्या। 5×1

(अ) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुः दुस्तरं मोहादुडुपेनास्मि सागरम्।।

(आ) मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः।।

### Unit - II

**2.** संक्षेपेण यथामति ***पञ्चप्रश्नानाम्*** उत्तरं संस्कृतभाषया देवनागरलिप्या च दीयताम्। 2×5

(क) रघुवंशमिति महाकाव्यस्य रचयिता कः?

(ख) रघुवंशस्य प्रथमः राजा कः?

(ग) कः वैवस्वतो मनुः?

(घ) रघुवंशमिति महाकाव्यस्य प्रसिद्धा टीका का? को वा रचयिता?

(ङ) दिलीपस्य विशेषणद्वयम् उल्लिख्यताम्।

(च) सुमेरुपर्वत इव कः विराजते?

(छ) "फलानुमेयाः प्रारम्भाः"– कस्य कार्यारम्भाः फलानुमेयाः?

## Section - B
### (Marks : 20)
### Unit - I

**3.** "माघे सन्ति त्रयो गुणाः" – इत्यस्य तात्पर्यम् आलोच्यताम्। 10

***अथवा,***

शिशुपालवधम् इति महाकाव्यस्य प्रथमसर्गम् अनुसृत्य नारदस्य अवतरणं श्रीकृष्णेण यथावलोकितं तद् वर्ण्यताम्। 10

### Unit - II

**4.** अधोलिखितेषु यथामति ***पञ्चप्रश्नानाम्*** उत्तरं संस्कृतभाषया देवनागरलिप्या च प्रदेयम्। 2×5

(क) कः आसीत् शिशुपालः?

(ख) नारदः कः भवति? स कस्य वार्तावाहकः?

(ग) कुत्रासीत् वासुदेवस्य निवासस्थानम्?

(घ) श्रीकृष्णं प्रति इन्द्रस्य का वार्ता आसीत्?

(ङ) 'क्रमादमुं नारद इत्यबोधि सः' – अत्र "सः" इति पदेन बोधितः?

(च) नारदस्य वीणायाः नाम किम्?

(छ) "शिशुपालवधम्" इति महाकाव्ये कति सर्गाः सन्ति?

## Section - C
### (Marks : 10)
### Unit - II

**5.** (क) अधोलिखितयोः कस्यापि ***एकस्य*** श्लोकस्य सप्रसङ्गं व्याख्या कार्या (संस्कृतभाषया देवनागरलिप्या च)। 5

(अ) "शक्यो वारयितुं जलेन हुतभुक्, छत्रेण सुर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदौ दण्डेन गोगर्दभौ।
व्याधिर्भेषजसँग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्।।"

(आ) ''शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमाः
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः।
तज्जाड्यं वसुधाधिपस्य कवयो ह्यर्थं विनापीश्वराः
कुत्स्याः स्युः कुपरीक्षका न मणयोर्यैरर्घतः पातिताः॥''

(ख) निम्नलिखितयोः ***कस्यैकस्य*** यथामति मातृभाषया अनुवादं कुरु। 5×1

(अ) वरं पर्वतदुर्गेषु भ्रान्तं वनेचरैः सह।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि॥

(आ) केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥

## Section - D
## (Marks : 15)
## Unit - II

**6.** अधोलिखितेषु किमपि विषय***त्रयम***वलम्ब्य संक्षिप्ता टीका कार्या। 5×3

(क) किरातार्जुनीयम्

(ख) जयदेवः

(ग) बुद्धचरितम्

(घ) श्रीहर्षः

(ङ) मेघदूतम्

———————